International Journal of Social Science Research (IJSSR)
Volume- 3, Issue- 1 | January - February 2026 ISSN: 3048-9490

# संस्कृतपत्रकारितायाः कालक्रमेण विकासः

**भूषण गौतम [1], आचार्य बृहस्पतिमिश्रः [2]**
[1] शोधच्छात्रः, संस्कृत विभागः, हिमाचल प्रदेश केन्द्रीय विश्वविद्यालयः, धर्मशाला, कांगड़ा (हि.प्र.)
[2] प्रोफेसर, संस्कृत-विभागः, हिमाचल प्रदेश केन्द्रीय विश्वविद्यालयः, धर्मशाला ( हि.प्र.)

**शोधसारः**

अस्य शोधप्रबन्धस्य मुख्यविषयः संस्कृतपत्रकारितायाः उद्भवः, विकासः, ऐतिहासिकपरम्परा च अस्ति। आदयोः शब्द-अर्थयोः दार्शनिकाधारः निरूपितः, यतः शब्दः एव अर्थस्य अभिव्यक्तिमाध्यमं भवति। वैदिकदृष्ट्या "शब्दब्रह्म" इति संकल्पना पत्रकारितायाः दार्शनिकमूलं प्रकाशयति। वेदेषु "दूत" संज्ञा, सभा-समिती-व्यवस्था, राजदूतप्रणाली च संचारव्यवस्थायाः प्राचीनरूपत्वेन विवृता। पुराणेषु विशेषतः नारदमुनेः संवादपरम्परा पत्रकारितायाः आद्यरूपेण निरूपिता। प्राक्-स्वातन्त्र्यकाले संस्कृतपत्रकारितायाः संगठितरूपेण आरम्भः अभवत् ।अनन्तरं स्वतन्त्रकालात् अनन्तरं कथं पत्रकारितायाः विकासः जातः तस्य विषये विस्तृतं वर्णनं वर्तते , एवञ्च आधुनिकसंस्कृतपत्रकारितायाः विषये ज्ञानं भविष्यति ।

**साङ्केतिक शब्दाः-** दूतः, पत्रकारिता, सूचनाक्रान्तिः, दूरदर्शनम्, अन्तर्जालम्, शब्दब्रह्मः ,लोकतन्त्रम्।

**प्रस्तावना-**

विश्वे शब्द-अर्थयोः चिन्तनपरम्परा प्राचीनकालाद् एव प्रचल्यमाना। शब्द-अर्थयोः सामान्यव्यवहारे तु सहायकः भवति एव, शास्त्रीय परम्परायामपि अस्य महत्त्वं सर्वसम्मतमस्ति। शब्दः अर्थस्य अभिव्यक्तेः माध्यमः। शब्दः अमूर्तार्थस्य मूर्तरूपमस्ति । शब्दः-अर्थः अन्योन्याश्रितः । उभयोः मेलनयोः एव सार्थकः शब्दः उत्पद्यते । अर्थेन विना शब्दः निर्जीवः भवति, एवञ्च शब्देन विना अर्थः अग्राह्यः।

शब्दः अर्थात् वाणी काव्यसर्जनस्य सार्धं लोकव्यवहारसञ्चालने निमित्तमपरिहार्यञ्च सर्वप्रधानं साधनमस्ति । सृष्टेः आरम्भाद् एव वाग् विचाराणां विनिमयस्य प्रधानमाध्यमं वर्तते। शब्दब्रह्मः अनादिः विनाशरहितम् अक्षरञ्च, तस्य विवर्त प्रक्रियया एव एतद् जगतं भासितं भवति । ब्रह्माण्डीयचेतनाशक्तयाः च उद्गमः किम् । अस्य अन्वेषणाय तत्वदर्शिनः ऋषयःनिष्कर्षयन्ति यत् एते आवेगाः यया शक्तया आन्दोलयन्ते सा शक्ति शब्दः।[1] स शब्दैव ब्रह्म । शब्दःएव ईश्वरजीवयोः एकया श्रृङ्खलया बध्नाति, एवमेव सृष्ट्युत्पत्तेः प्रारम्भरपि शब्देन। पञ्चतत्त्वेषु प्रथमः आकाशः अस्य तन्मात्रा शब्दः इति। सर्वे वेदाः यस्य पदस्य प्रतिपादनं कुर्वन्ति, सर्वे तपः यस्य चर्चा कुर्वन्ति, यस्याः कामनया जनाः ब्रह्मचर्यं

*Corresponding Author Email: Bush.sol09@gmail.com
Published: 19 February 2026
DOI: https://doi.org/10.70558/IJSSR.2026.v3.i1.30844
Copyright © 2026 The Author(s). This work is licensed under a Creative Commons Attribution 4.0 International License (CC BY 4.0).

[1] अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।वा°1

International Journal of Social Science Research (IJSSR)
Volume- 3, Issue- 1 | January - February 2026 ISSN: 3048-9490

चरन्ति। तस्य पदस्य संक्षेपरूपेण वदामि, सः अस्ति(ॐ) । एतद् अक्षरं(शब्दः) एव अपरब्रह्मः परब्रह्मश्च कठोपनिषदि ओंकारःइति ।[2]

**उद्देश्यं क्षेत्रञ्च-** मानवस्य जन्मनाद् एव जिज्ञासु प्रवृतिः भवति। पुरातनकालात् आधुनिककालपर्यन्तं यदि मानवानामितिहासं पश्यामः, तदा एतद् कथनं मिथ्या न भविष्यति, यद् मानवजीवने विकासार्थं जिज्ञासाप्रवृतिः सहायका भवति । स्वकीयपरितः जायमानाः, घटनाभिः, परिवेशेणच समाजस्य विषये ज्ञातुं मानवस्य जिज्ञासया एव पत्रकारितायाः उद्भवः जातः। मानवः यथायथं विकासमकरोत्, तथैव तस्य विचारेषु परिपक्वता आगता। प्रारम्भिककाले सूचनाप्रसारणाय सम्प्रेषणस्य माध्यमाः तु आसीत्, परञ्च तेषां परिष्कृतं रूपं नासीत्। शनैः-शनैः मानवः सभ्यतायाः विकासं प्राप्तवान्, तदा पत्रकारितायाः स्वरूपस्य निर्धारणमभूत्। पत्रकारिता समाजस्य प्रतिबिम्बः, या सामाजे जायमाना घटनायाः यथार्थं चित्रणं प्रदर्शयति।

**पत्रम्-** विलिख्य स्वविचाराणां प्रकटिकरणं येन माध्यमेन भवति तत् पत्रम्। शब्दकल्पद्रुमानुसारं- "पत्+ष्ट्रन"(करणे) ग्रन्तर्निवन्तत्वात् तथात्वम् । लेखनाधारः। पात् इति भाषा। 'पात्यते स्थानात् स्थानान्तरं समाचारोऽनेन' शाब्दिकार्थो भवति, एतादृशः कर्गदः यस्योपरि वार्ता लिखितरूपेण भवति ।[3]

**पत्रकारः**[4]**-** पत्रकारः तमुच्यते यः समसामयिक – घटनाः एकत्रं करोति, जनेषु विभिन्नमाध्यमैः विस्तारयति।

**पत्रकारिता-** पत्रं करोति तच्छीलमस्य इति विग्रहे पत्रशब्दोपपदात् डुकृञ् करणे धातोः णिनि प्रत्यये[5] कृते पत्रकारिन्। पुनः तद् भावे तल् प्रत्ययः[6] पत्रकारित टापि[7] कृते पत्रकारिता शब्दः निष्पन्नः। पत्रकारिता इत्युक्ते पत्रपत्रिकाणां लेखनपठनमुद्रण-प्रकाशनादिस्वभाववत्वं कर्मत्वं वा ।[8]

**पत्रकारितायाःआरम्भिकस्वरूपम्-**

महर्षिनारदमुनिः पत्रकाराणां प्रेरणास्रोतः, प्राचीनकालस्य प्रथमपत्रकाररूपेण कथितुं शक्यते। सूचनायाः प्रसारः प्रथमतया महर्षिः अकरोत्, नारदमुनिः पत्रकारितायाः पितामहः। पुराणेषु नारदमुनिः भागवतस्य संवाददातारूपेण प्रस्तुतः। विशेषतः भागवतपुराणे नारदस्य भूमिका अत्यन्तं महत्त्वपूर्णा दृश्यते। सः न केवलं संवादप्रवर्तकः, अपि तु घटनाविश्लेषकः अपि आसीत्। उदाहरणतः ध्रुवोपाख्याने, प्रह्लादचरिते च नारदस्य मार्गदर्शनम् समाजहितदृष्ट्या महत्वपूर्णम् आसीत्। नारदमुनेः रचिते भक्तिसूत्रे प्रत्यक्षरूपेण प्रतीयते यत्, सूत्रे भक्तिमार्गस्य दर्शनं दत्तः परञ्च सूक्ष्मतया यदावलोकयामः तदा पत्रकारितायाः शाश्वतसिद्धान्तानां प्रतिपालनम् अस्ति । उक्तञ्च- मतानां विभिन्नतानेकता च अस्ति, सैव पत्रकारितायाः मूल सिद्धान्तः ।[9]

---

[2] सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीमि ओमित्येतत्।। कठ्०उ०२-२५

[3] शब्दकल्पद्रुमः – तृतीय भागः पृष्ठाङ्कः – २६

[4] अपर नामानि- दूतः,संदेशवाहकः संस्कृत-हिन्दी कोश पृष्ठङ्कः- ४६८

[5] सुप्यजातौ णिनिश्ताच्छील्ये- अष्टा०-३-२-७८

[6] तस्य भावस्त्वतलौ - अष्टा०-५-१-११९

[7] अजाद्यतष्टाप् – अष्टा० -४-१-३

[8] संस्कृत-पत्रकारिता - डॉ०- बलदेवानन्दसागरः

[9] "तल्लक्षणानि वच्यन्ते नानामतभेदात्।"(भ०सू०१५)

**वेदेषुपत्रकारिता-**

सूचना,पत्रकारिता, दानादानपरम्परा च प्राचीनतमा दृश्यते, यस्याः संकेतः वेदादिषु प्राचीनतमग्रन्थेषु द्रष्टुं शक्यते, वेदज्ञानस्य नित्यत्वादपौरुषेयत्वाच्चेति। प्राचीनकालेऽपि मानवाः परस्परं वार्तालापं, संदेशप्रेषणं, पठन-पाठनादिकं विचारविनिमयादिकञ्च विदधति स्म। दिककाले सभा तथा समिति इति द्वौ प्रमुखौ संस्थानौ स्तः।[10] तत्र जनसम्बद्धविषयाः चर्चिताः। एषा व्यवस्था लोकतन्त्रस्य आरम्भिकरूपेण ज्ञायते। राजदूतव्यवस्था अपि प्राचीनकाले प्रचलिता आसीत्। दूताः राज्यात् राज्यं प्रति सन्देशान् नयन्ति स्म। एषा प्रणाली आधुनिकसमाचारसंस्थायाः पूर्वरूपम् इति वक्तुं शक्यते।

विविधेषु प्राचीन-भारतीयसंस्कृतग्रन्थेषु वर्णितमुपलभ्यते। तेन सिध्यति यत् तत्र पत्रकारिता-संचारविषयसम्बद्धः व्यवहारः प्राचीनकालेऽपि विकसितः। अत्र संकेतरूपेण कानिचिद् प्रमाणानि द्रष्टव्यानि-

- **अग्निं दूतं वृणीमहे०।**[11]
- **अग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे।**[12]
- **इतं वा विश्ववेदसम्।**

इत्यादिषु नैकेषु मन्त्रेषु अग्निदेवो दूतरूपः (पत्रकारः) प्रोक्तः। विचारादिसंप्रेषकः, सूचनादिप्रापको वा दूतः। दूत शब्दस्य गत्यर्थे (गतेस्त्रयोऽर्थाः ज्ञानं गमनं प्राप्तिश्चेति) जवनार्थे, द्रवणार्थे वा प्रयोगः पत्रकारिता-सूचना ज्ञानपरकमर्थं द्योतयति।

- वेदभाष्ये व्याचचक्षे महर्षिदयानन्दोऽपि- दूतं-यो दुनोति पदार्थान् देशान्तरं प्रापयति तम्। यो दूतवत् देशान्तरं समाचारप्रापकम्।

**रामचरितमानसे पत्रकारिता-** रामचरितमानसे संवादसंप्रेषणः सक्षमपत्रकारितायाः

मूलतत्वम्। मानसे प्रथमवारं 'समाचार' (पत्रकारितायाःपर्यायः) शब्दस्य उपयोगः तदा जातः, यदा सती स्वकीय पितुः यज्ञे स्वं जुहोति।

**तदा-"समाचार सब शंकर पाये,वीरभद्र करि कोप उठाये।**

**जग्य विध्वंस जाये तिन्ह कीन्हा,सकल सुरूह विधिवत दण्ड दीन्हा।।[13]"**

तुलसीदासः अस्याः घटनायाः वर्णनं समाचार (पत्रकारित) रूपेण करोति। एवमेव-

**"नारद समाचार सब पाये,कौतुकही गिरि गेह सिधाये[14]"**

**प्राक्-स्वातन्त्र्यकालिकी संस्कृतपत्रकारिता-**

१८३२ तमे वर्षे, एशियाटिक्-सोसायटी-आफ़-बंगाल इत्येषा आङ्ग्लभाषायां संस्कृतभाषायां च द्विभाषीय-पत्रिकायाः प्रकाशनम् आरब्धवती, यस्मिन् संस्कृतसाहित्यस्य शोधपत्राणि, पुरातत्त्वैः पूरिताः शोधपत्राणि च प्रकाशितानि। संस्कृत-पत्रकारीय-इतिहासस्य प्रथम, पत्ररूपेण "काशी-विद्यासुधानिधि" इत्यस्य नाम (प्रथमवारं १ जून १८६६ दिनाङ्के काशीतः

---

10 ऋग्वेदे (१०.८५) सभासमितीप्रणालीविषये संकेताः।

11 ऋगवेद- अग्निसूक्त १-१२-१

12 ऋग्वेद- अग्निसूक्त ८-४४-३

13 रामचरितमानस बालकाण्ड

14 रामचरितमानस बालकाण्ड

प्रकाशितम्) । एषा पत्रिका 'पण्डित् पत्रिका' इति नाम्ना अपि प्रसिद्धा अस्ति । "कामनन्दिनी" इत्यस्य प्रकाशनं १८३७ तमे वर्षे काशीतः एव आरब्धम्। शुद्धसंस्कृतस्य एते पत्रिकाः प्राचीनसंस्कृतग्रन्थान् प्रकाशयन्ति स्म। तेषु शुद्धपत्राणां चिह्नं नासीत्। १८७२ तमे वर्षे एप्रिल्-मासे लाहोर-नगरात् वर्तमानपत्ररूपेण 'विद्योदय' इत्यस्य प्रकाशनं आरब्धम्। अस्य सम्पादकः हृषिकेश् भट्टाचार्यः संस्कृतपत्रकारीय दृढं आधारं प्रददत्।

१८६६ईस्वीय वर्षादारब्धा संस्कृतपत्रकारितायाः यात्रा अनेकविधाः बाधाश्चापि अन्वभवत्। अनेकत्र कण्टकाकीर्णे मार्गे संस्कृतपत्रकारितायाः विकास-यात्रैषा कदाचित् मन्दतामुपागता, कदाचिच्च अवरूद्धगतिका जाता, परञ्च सौभाग्यस्यायं विषयो यत् सतीष्वपि अनेकासु बाधासु यात्रैषा निरन्तरमग्रेसृता। संस्कृतभाषायाः सम्पर्केण सर्वाः अपि भारतीयाः प्रदेशभाषाः उत्तरोत्तरमवर्धन्त।

संस्कृते दैनिकवार्तापत्रस्य प्रकाशनं सर्वथा दुष्करं कार्यं, तदपि १९०७तमे वर्षे जनवरीमासस्य प्रथमदिनाङ्कात् 'जयन्ती' इत्याख्यं प्रथमं संस्कृतदिनपत्रं केरलराज्यस्य त्रिवेन्द्रम्-नगरात् प्रकाशितमासीत्। कोमलमारुताचार्यः लक्ष्मीनन्दस्वामी च अस्य संस्कृतदिनपत्रस्य सम्पादकौ आस्ताम्। संस्कृतपत्रकारितायाः इतिहासे इदं नूनमवधेयं यत् संस्कृतपत्रपत्रिकाणां विकासः प्रायेण मासिक-पत्रिकाणां प्रकाशनेन सहैव आरब्धः।

प्राक्–स्वातन्त्र्यकालिकी संस्कृतपत्रकारिता संघर्ष-समर्पण-आदर्शवादिता च इत्येषां त्रयाणां समन्वितं इतिहासः अस्ति। एषा पत्रप्रकाशनपरम्परा न, अपितु सांस्कृतिकरक्षणस्य, बौद्धिकस्वातन्त्र्यस्य, तथा राष्ट्रीयचेतनायाः वहिका आसीत्।

१८३२ तमे वर्षे आरब्धः लघुप्रयत्नः १९०७ तमे वर्षे दैनिकपत्रप्रकाशनपर्यन्तं विकसितः। अस्याः यात्रायाः फलस्वरूपं स्वातन्त्र्योत्तरकाले संस्कृतपत्रकारिता अधिकसुदृढा जाता।

**स्वातन्त्र्योत्तरकालिकी संस्कृतपत्रकारिता-**

१९४७वर्षतः १९७०मितं वर्षं यावत् यत् किमपि संस्कृतपत्रपत्रिकाजातं प्रकाशितम्, तत्सर्वं स्वातन्त्र्योत्तरकालिकसंस्कृतपत्रकारितारूपेण विभावनियम्। ईस्वीये १९४७तमे वर्षे सर्वप्रथमं स्वतन्त्रभारतस्य प्रथमं संस्कृतसाप्ताहिकपत्रं 'सुरभारती' इति मुम्बईतः प्रकाशितम्।[15] एतत् पत्रं स्वातन्त्र्योत्तरकालिकसंस्कृतपत्रकारितायाः आद्यचरणस्य प्रतिनिधिरूपेण द्रष्टुं शक्यते। सुरभारती इत्यस्य प्रमुखलक्ष्यं संस्कृतभाषायाः व्यवहारक्षमता प्रदर्शयितुं आसीत्। अस्मिन् पत्रे राष्ट्रियवार्ताः, राजनैतिकविश्लेषणानि, साहित्यलेखाः, संस्कृतकाव्यानि, सम्पादकीयाः च प्रकाशिताः।

स्वातन्त्र्यप्राप्तेः अनन्तरं भारतदेशे राष्ट्रियचेतना, भाषाजागरणं, सांस्कृतिकपुनरुत्थानम् इत्यादीनां प्रवाहः तीव्रतया अभवत्। राष्ट्रभाषा, मातृभाषा, शास्त्रभाषा च इति विषये बहवः विमर्शाः अभवन्। संस्कृतभाषा भारतस्य सांस्कृतिकमूलम् इति भावनया तस्याः पुनरुत्थानाय अनेकानि प्रयत्नानि आरब्धानि। विश्वविद्यालयेषु संस्कृताध्ययनस्य विस्तारः, शोधकार्याणां प्रवृत्तिः, अकादमिकसंस्थासु संस्कृतविभागानां स्थापना च अभवत्।

एतेषु परिवर्तनेषु पत्रकारिता अपि एकं प्रमुखं साधनम् अभवत्। जनसामान्यपर्यन्तं संस्कृतभाषां नेतुं पत्रपत्रिकाः अत्यन्तं उपकारिण्यः अभवन्।

**आधुनिकीसंस्कृतपत्रकारिता-**

विंशशताब्दस्य अन्तिमचरणे संजातायाः सूचनाक्रान्तेः कारणात् साम्प्रतम् आधुनिकपत्रकारितायामनेकविधं परिवर्तनं

---

15 संस्कृत-पत्रकारिता

दरीदृश्यते। एकस्यामेव कस्याञ्चित् भाषायां प्रकाश्यमानस्य दैनिकवार्ता-पत्रस्य साप्ताहिक्याः पाक्षिक्याः वा वार्तापत्रिकायाः पृथक्-पृथक् अङ्काः विभन्नान् विषयान् आधृत्य प्रकाश्यन्ते। एतेषु विषयेषु बालपत्रकारिता, क्रीडापत्रकारिता, वाणिज्यपत्रकारिता इत्यादयो विभिन्नाः विषयाः आधुनिकपत्रकारितायामन्तर्भाविताः सञ्जाताः।

संस्कृत-पत्रकारिता भाषायाः दृष्ट्या विश्वस्य सर्वाधिकस्य वैज्ञानिकस्य गौरवपूर्णस्य च इतिहासस्य प्रेरणा साक्षी च संस्कृतभाषा, वर्तमानयुगे पत्रकारितायाः माध्यमस्य च प्रभावस्य अनन्त-सम्भावनाभिः निश्चयेन पूरिता अस्ति। संस्कृतभाषा न केवलं भारतस्य प्राचीनतमभाषा, अपि तु विश्वस्य अत्यन्तवैज्ञानिकरूपेण संरचिताभाषा अस्ति। अस्याः भाषायाः व्याकरणिकसुदृढता, शब्दसम्पदा, तत्त्वचिन्तनपरम्परा च ताम् अद्वितीयां कुर्वन्ति। अतः पत्रकारितायाः माध्यमेन संस्कृतस्य प्रयोगः केवलं परम्परारक्षणं न, अपि तु आधुनिकचिन्तनस्य अपि अभिव्यक्तिमार्गः अस्ति।

संस्कृतपत्रकारिता भाषायाः गौरवं, सांस्कृतिकपरम्परां, राष्ट्रीयएकतां च संवर्धयति। एषा पत्रकारिता केवलं धार्मिकविषयान् न प्रकाशयति, किन्तु सामाजिकम्, आर्थिकम्, वैज्ञानिकम्, राजनैतिकम्, वैश्विकम् च चिन्तनं संस्कृतेन व्यक्तं करोति।

अद्यत्वे, यदा भारते विद्युन्मानमाध्यमाः मुद्रणमाध्यमाः च द्रुतगत्या प्रसारयन्ति, तदा संस्कृत-पत्रकारीयस्य अपि तत्र विशिष्टं स्थानं वर्तते। संस्कृत-पत्रकारीय-विषये सुशिक्षित-पाठकाः जानीयुः यत् भारतस्य प्रायः सर्वेषु राज्येषु, केषुचित् विदेशेषु च संस्कृत-पत्रिकाः प्रकाश्यन्ते इति। २०१६-१७तमे वर्षे, संस्कृत-पत्रकारीयस्य १५० तमे वर्षे, भारतीय-संस्कृत-पत्रकार-सङ्घः राष्ट्रियस्तरे अनेकाः कार्यशालाः आयोजयत् । संस्कृतभारती इत्यस्याः संस्थायाः प्रयत्नेन संस्कृतपत्रिकाः, समाचारपत्राणि च देशव्यापिनि सञ्चरन्ति।एवमेव केन्द्रीयसंस्कृतविश्वविद्यालयः अपि विविधाः संस्कृतपत्रिकाः प्रकाशयति। एतेषां माध्यमेन संस्कृतभाषा केवलं पाठशालासु न, अपि तु जनजीवने अपि सक्रियतया प्रवर्तते। निःसन्देहम्, संस्कृतप्रेमिणः राष्ट्रस्य मुख्यधारया सह संस्कृतपत्रकारीयं व्यावहारिकरूपेण योजयितुं अहोरात्र कार्यं कुर्वन्तः सन्ति ।

**श्रव्य-दृश्य-माध्यमेषु-** साम्प्रतं न केवलं पत्रपत्रिकाणां मुद्रणमेव पत्रकारिताक्षेत्रे परिगण्यते, अपि तु श्रव्य-दृष्य-पत्रकारितायाः वैद्युदाणविकपत्रकारितायाश्चापि तादृशमेव। श्रव्यपत्रकारिताक्षेत्रे आकाशवाण्याः राष्ट्रिय-प्रसारणे प्रतिदिनं संस्कृतवार्ता- प्रसारणं भवति। दूरदर्शनतः प्रतिदिनं प्रातः संस्कृतवार्ताः प्रसार्यन्ते। अद्यत्वे संस्कृत-पत्रकारीयक्षेत्रे बह्व्यः परिवर्तनाः प्रचलन्ति। अद्य अन्तर्जालमाध्यमेषु यूट्यूब, वेब-फलके, सामाजिक-माध्यमानि च श्रव्य-दृश्य-पत्रकारितायाः नूतनं स्वरूपं ददति। प्रत्यक्ष-प्रसारणम् (Live Streaming), वेबिनार-चर्चा, प्रतिभासीय-साक्षात्काराः च सर्वत्र प्रचलिताः सन्ति। श्रव्य-दृश्य-माध्यमेषु पत्रकारिता आधुनिक-युगस्य सशक्ततमं जनसञ्चार-साधनम् अस्ति। सा न केवलं घटनानां वर्णनं करोति, अपि तु समाजस्य विचारधारां निर्माति, लोकतन्त्रं सुदृढं करोति, सांस्कृतिक-संवादं च प्रवर्धयति।

दूरदर्शनेन संस्कृत-वार्ताः प्रतिदिनं प्रसारिताः भवन्ति, येन संस्कृतभाषा आधुनिकविषयेषु अपि प्रयुज्यते। एतेन नूतन-शब्दनिर्माणं भवति तथा भाषायाः अभ्यासः भवति। पत्रकारिता समाजस्य सशक्ततमं जनसञ्चार-साधनम् अस्ति। सा न केवलं घटनानां प्रकाशनं करोति, अपि तु जनमत-निर्माणे, शिक्षायां, संस्कृतिप्रसारे च महत्त्वपूर्णं योगदानं ददाति।अतः संस्कृतपत्रकारीतायाः भविष्यम् उज्ज्वलम् इति निश्चयेन वक्तुं शक्यते। आधुनिकसंस्कृतपत्रकारिता डिजिटलयुगे महान् अवसरान् वहति। यदि संस्कृतभाषा सरलशैल्यां, संवादात्मकप्रयोगेन, समसामयिकविषयान् प्रबोधयिष्यति, तर्हि अस्याः प्रभावः अत्यधिकं वर्धिष्यते। ई-पत्रकारिता, संवाद-प्रसारणम्, प्रतिभासीय संगोष्ठी, सामाजिकमाध्यमेषु च सजीवसंवादः एतेषु सर्वेषु संस्कृतस्य उपयोगः कर्तुं शक्यते। अतः निःसन्देहं वक्तुं शक्यते—यदि समुचितप्रोत्साहनं, प्रशिक्षणं, तकनीकीसमर्थनं च लभ्येत, तर्हि संस्कृतपत्रकारिता विश्वमञ्चे अपि स्वकीयं विशिष्टं स्थानं स्थापयितुं समर्था भविष्यति।

**उपसंहारः**

उपर्युक्तविवेचनात् स्पष्टं भवति यत् शब्द-अर्थयोः परस्पराश्रितता एव पत्रकारितायाः मूलाधारः अस्ति। शब्दः न केवलं वाणीस्वरूपेण विचारप्रकाशनस्य साधनम्, अपि तु समाजचेतनायाः जागरणहेतुः अपि अस्ति। वैदिकदृष्ट्या 'शब्दब्रह्म' इत्यस्य सिद्धान्तः, उपनिषत्सु 'ॐ' इत्यस्य दार्शनिकप्रतिपादनम्, पुराणेषु संवादपरम्परा, तथा दूतव्यवस्थायाः उल्लेखः- एते सर्वे दर्शयन्ति यत् भारतीयपरम्परायां सूचना-विनिमयस्य सुदीर्घा समृद्धा च परम्परा आसीत्। महर्षिनारदादयः संवादप्रवर्तकाः आद्यपत्रकाररूपेण द्रष्टुं शक्यन्ते। तेषां कृतित्वे यथार्थवृत्तान्तप्रसारणम्, समाजहितदृष्टिः, तथा मतवैचित्र्यस्य स्वीकृतिः दृश्यते, या आधुनिकपत्रकारितायाः अपि आधारशिला अस्ति। वेदेषु 'दूत' इत्यस्य प्रयोगः, सभा-समित्योः व्यवस्था, तथा प्राचीनग्रन्थेषु संवादपरम्परा—एते सर्वे पत्रकारितायाः आदिमस्वरूपस्य सूचकाः सन्ति। संस्कृतपत्रकारितायाः व्यवस्थितरूपेण आरम्भः एकोनविंशतिः शताब्देः अभवत्। 'काशी-विद्यासुधानिधिः', 'विद्योदयः', 'जयन्ती' इत्यादीनां पत्रिकाणां प्रकाशनम् अस्याः यात्रायाः स्तम्भरूपेण अभवत्। प्राक्-स्वातन्त्र्यकाले संस्कृतपत्रकारिता संघर्षः, समर्पणम्, आदर्शवादिता च इत्येतैः गुणैः युक्ता आसीत्। सा केवलं पत्रप्रकाशनपरम्परा नासीत्, अपि तु सांस्कृतिकरक्षणस्य, राष्ट्रीयचेतनायाः, बौद्धिकस्वातन्त्र्यस्य च वाहिका आसीत्। स्वातन्त्र्योत्तरकाले 'सुरभारती' इत्यादीनां पत्रिकाणां माध्यमेन संस्कृतपत्रकारिता नवचेतनां प्राप्तवती। एषा पत्रकारिता राष्ट्रनिर्माणे, भाषाजागरणे, सांस्कृतिकपुनरुत्थाने च महत्त्वपूर्णं योगदानम् अददात्। विश्वविद्यालयेषु शोधकार्यवृद्धिः, अकादमिकसंस्थासु प्रकाशनपरम्परा, तथा सामाजिकमाध्यमेषु संस्कृतस्य प्रवेशः—एते सर्वे संस्कृतपत्रकारितायाः सुदृढीकरणाय सहायकाः अभवन्। आधुनिकप्रयीभासीय युगे श्रव्य-दृश्य-माध्यमानां प्रभावः अत्यधिकः दृश्यते। आकाशवाणी-दूरदर्शनयोः संस्कृतवार्ताप्रसारणम्, अन्तर्जालमाध्यमेषु संस्कृतसामग्रीप्रसारः, प्रतिभासीय -चर्चाः, सामाजिकमाध्यमेषु संवादाः- एते सर्वे संस्कृतपत्रकारितायाः नूतनं आयामं निर्मितवन्तः। एतेन संस्कृतभाषा केवलं परम्परागतशास्त्रभाषा न, अपि तु समसामयिकविषयेषु अपि सजीवरूपेण प्रयुज्यमाना इति सिद्ध्यति।

अतः निष्कर्षतया वक्तुं शक्यते यत् संस्कृतपत्रकारिता अतीतपरम्परायाः गौरवं वहन्ती, वर्तमानसमाजस्य आवश्यकतानुसारं रूपान्तरं स्वीकृतवती, भविष्ये अपि विश्वमञ्चे स्वकीयं विशिष्टं स्थानं स्थापयितुं समर्था अस्ति। यदि तस्याः सरलशैली, व्यवहारोपयोगिता, तकनीकीसामर्थ्यं च संवर्ध्येत, तर्हि संस्कृतपत्रकारिता न केवलं सांस्कृतिकधरोहररक्षणाय, अपि तु वैश्विकसंवादाय अपि प्रभावी माध्यमं भविष्यति। एवं संस्कृतपत्रकारिता शब्दब्रह्मपरम्परायाः आधुनिकप्रकाशरूपेण समाजे ज्ञानप्रसारस्य, जनमतनिर्माणस्य, सांस्कृतिकएकतायाः च सशक्तं साधनं इति निःसन्देहं प्रतिपादयितुं शक्यते।

सन्दर्भग्रन्थाः-

1. बैरवा, सुमेर सिंह. (2019). आधुनिक संस्कृत साहित्य एवं पत्रकारिता. भारतीय विद्या प्रकाशन.
2. मिश्र, रामगोपाल. (1976). संस्कृत पत्रकारिता का इतिहास. विवेक प्रकाशन.
3. मिश्र, विमला. (2002). स्वातन्त्र्योत्तर हिन्दी पत्रकारिता. इलाहाबाद विश्वविद्यालय.
4. गयावाल, लालाशंकर. (2021). स्वातन्त्रोत्तर संस्कृत शोध पत्रकारिता. विद्यानिधि प्रकाशन.
5. सागर, बलदेवानन्द. (2011). संस्कृत पत्रकारिता. संस्कृत भारती.
6. सुधर्मा. (1970). सुधर्मा: संस्कृत प्रतिदिन वार्तापत्र. सुधर्मा ट्रस्ट.
7. लोकसंस्कृतम्. (1985). संस्कृत कार्यालय, श्री अरविन्द आश्रम.
8. संस्कृत प्रतिभा. (1980). साहित्य अकादमी.